# आदर्श प्रश्नपत्रम् (2026-27)

# विषय : संस्कृतम्

**कक्षा - द्वादशी** **कोड न. - 526**

रोल नं० | | | | | | | | | | |

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

---

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**
  I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
  II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 17 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

भारतीयपरम्परायां सत्यवादी हरिश्चन्द्रस्य नाम आदरेण स्मर्यते। सः इक्ष्वाकुवंशस्य प्रतापी राजा आसीत्। तस्य जीवनस्य मूलाधारः सत्यपालनम् एव आसीत्। महर्षेः विश्वामित्रस्य प्रेरणया तस्य सत्यनिष्ठायाः परीक्षा कृता। प्रतिकूलपरिस्थितिषु अपि सः सत्यस्य मार्गात् कदापि विचलितः न अभवत्। राज्यस्य तथा धनस्य परित्यागं कृत्वा अपि हरिश्चन्द्रः स्वप्रतिज्ञां रक्षितवान्। अन्ते सः श्मशाने कर्मकररूपेण कार्यम् अकरोत्। तस्य अचलसत्यनिष्ठया प्रसन्नाः भूत्वा देवाः तस्मै यशः सम्मानञ्च पुनः प्रदत्तवन्तः।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) हरिश्चन्द्रः कस्य वंशस्य राजा आसीत्?
(ख) हरिश्चन्द्रस्य जीवनस्य मूलाधारः कः आसीत्?
(ग) हरिश्चन्द्रः अन्ते कुत्र कार्यम् अकरोत्?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) भारतीयपरम्परायां हरिश्चन्द्रस्य नाम कथं स्मर्यते?

(ख) हरिश्चन्द्रः राज्यस्य परित्यागं कृत्वा अपि किं रक्षितवान्?

(ग) के हरिश्चन्द्रस्य सत्यनिष्ठया प्रसन्नाः अभवन्?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) "अकरोत्" इत्यस्मिन् पदे कः लकारः?
(क) लट्-लकारः (ख) लोट्-लकारः
(ग) लङ्-लकारः (घ) विधिलिङ्-लकारः

(ii) गद्यांशे "राजा" इत्यस्य पदस्य किं विशेषणपदं प्रयुक्तम्?
(क) राजा (ख) प्रतापी
(ग) वंशस्य (घ) मूलाधारः

(iii) गद्यांशे "अनुकूलः" इत्यस्य पदस्य किं विलोमपदं प्रयुक्तम्?
(क) प्रतिकारः (ख) प्रतिकूलः
(ग) प्रतापी (घ) कठिनः

(iv) 'धनस्य परित्यागं कृत्वा अपि हरिश्चन्द्रः स्वप्रतिज्ञां रक्षितवान्।' इत्यस्मिन् वाक्ये क्रियापदं किम्?

(क) सः (ख) इक्ष्वाकुवंशस्य
(ग) राजा (घ) रक्षितवान्

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य पञ्चवाक्यानि संस्कृतभाषया लिखत - 5

(क) सत्सङ्गतिः

(ख) मम प्रियः कविः

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) अनुशासनम्

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) मालिनीछन्दसः लक्षणं किम्?

(ख) वंशस्थछन्दसः उदाहरणं किम्?

(ग) शिखरिणीछन्दसि कति वर्णाः भवन्ति?

(घ) उक्ता ............... तभजाजगौगः । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) अतिशयोक्ति-अलङ्कारस्य लक्षणं किम्?

(ख) श्लेषस्य अलङ्कारस्य उदाहरणं किम्?

(ग) उत्प्रेक्षायाः अलङ्कारस्य लक्षणं किम्?

(घ) सत्यर्थे पृथगर्थायाः ..........................।

क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः 'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमो य उ विद्यायां रताः।।

**अथवा**

इत्यर्घ्यपात्रानुमितव्ययस्य

रघोरुदारामपि गां निशम्य।

स्वार्थोपपत्तिं प्रति दुर्बलाश-

स्तमित्यवोचद्वरतन्तुशिष्यः।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां महात्म्यम्-एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्च तुरङ्गबलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते।

**अथवा**

श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरणेन आगत्य ओडिशासर्वकारस्य अधीने प्रायः वर्षत्रयेभ्यः कार्यं करोति। तथाप्यस्मिन् वर्षत्रयात्मके कालखण्डे एकवारमपि स्वराज्यं केरलं प्रति गमनाय इच्छां न प्रकटितवान्।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।

(ख) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

(ग) माभूत्परीवादनवावतारः।

(घ) यो यस्य मित्रं न हि तस्य दूरम्।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम् ।

रमते न मरालस्य मानसं मानसं विना ॥

**अन्वयः :-**

यद्यपि 1) ................ नीरज-राजितं 2) ..................... अस्ति, (परन्तु) 3) ...................... मानसं

4) ......................... विना न रमते।

**मञ्जूषा**

| नीरम् , सर्वत्र , मानसम् , मरालस्य |
| --- |

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

**प्रश्नाः :-**

(क) सन्मित्रलक्षणं के प्रवदन्ति?

(ख) कः गुह्यं निगूहति?

(ग) "हिताय" इत्यस्मिन् पदे का विभक्तिः अस्ति?

(घ) अत्र 'पुण्यात्' पदस्य विपर्ययः किं पदमस्ति?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

अहो असारोऽयं संसारः, कदा कस्य किं भविष्यतीति न ज्ञायते। यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति।

**प्रश्नाः :-**

(क) अयं संसारः कीदृशः?

(ख) दानभोगैर्विना किं सफलं न भवति?

(ग) 'भविष्यतीति' इत्यस्मिन् पदे कः सन्धिः?

(घ) 'भवति' इत्यस्मिन् पदे कः लकारः?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)

4×1=4

(क) समुद्रः राज्ञे व्ययार्थं रत्नचतुष्टयं दत्तवान्। (केषाम् / किमर्थम्)

(ख) वरतन्तुः मन्त्रकृताम् अग्रणीः आसीत्। (काम् / केषाम्)

(ग) उत्पथैः मम मनः पारिप्लवं धावति। (कम् / कस्य)

(घ) अतिजवेन दूर्मतिक्रान्तः सः चपलः दृश्यते। (किम् / कीदृशः)

(ङ) श्रीदासः तत्पत्रमुद्घाटितवान्। (कः / कम्)

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) 'विद्ययाऽमृतमश्नुते' इति पाठः कस्मात् ग्रन्थात् सङ्कलितः?

(ख) 'कर्मगौरवम्' अयं पाठः कस्मात् ग्रन्थाद् उद्धृतः?

(ग) महाकविः भवभूतिः कस्य रसस्य अभिव्यक्तये विशेषं प्रशस्यते?

(घ) रघुवंशमहाकाव्ये कति सर्गाः सन्ति?

(ङ) शुकनासोपदेशे नायकस्य नाम किम्?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) कालिदासस्य सर्वोत्कृष्टं नाटकं किमस्ति?

(ख) हर्षचरितस्य रचयिता कः?

(ग) 'पाषाणीकन्या' इत्यस्य कथासंग्रहस्य मूललेखकः कः?

(घ) दशकुमारचरितस्य रचयिता कः?

(ङ) नैषधीयचरितस्य रचयिता कः?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. विसर्गसन्धेः अथवा गुणसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

14. तत्पुरुषसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

15. कर्मकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

1) 'तांस्ते' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) ताम् + ते ख) तांस् + ते

ग) तान् + ते घ) तां + स्ते

2) 'भूपतिर्भासुर' इत्यस्मिन् शब्दे कः सन्धिः?

क) गुणसन्धिः ख) व्यञ्जनसन्धिः

ग) विसर्गसन्धिः घ) वृद्धिसन्धिः

3) 'तदेहि' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) तत् + एहि ख) तत् + इहि

ग) तद् + एहि घ) तद् + इहि

4) 'प्रविश्य' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) ष्यञ् ख) ल्यप्

ग) क्त्वा घ) तव्यत्

5) 'ग्रस्यमानः' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) मान् ख) क्तवतु

ग) शतृ घ) शानच्

6) 'त्यज् + क्त्वा' एतयोः संयोगे किं रूपम्?

क) त्यज्त्वा ख) त्यक्त्वा

ग) त्यक्ता घ) त्याज्या

7) 'मेघमाला' इत्यस्मिन् शब्दे कः समासः?

क) चतुर्थीतत्पुरुषः ख) पञ्चमीतत्पुरुषः

ग) अव्ययीभावसमासः घ) षष्ठीतत्पुरुषः

8) 'पुष्पाञ्जलिम्' इत्यस्य शब्दस्य कः विग्रहः?

क) पुष्पाणाम् अञ्जलिम् ख) पुष्पम् अञ्जलिम्

ग) पुष्पैः अञ्जलिम् घ) पुष्पेषु अञ्जलिम्

9) 'वाक् एव भूषणम्' अत्र समस्तपदम् किम्?

क) वाग्भूषणम् ख) वाचिभूषणम्

ग) वाचभूषणम् घ) वाक्भूषणम्

10) 'जनस्य' इत्यस्मिन् शब्दे का विभक्तिः?

क) तृतीया ख) चतुर्थी

ग) पञ्चमी घ) षष्ठी

11) 'युज्यस्व' इत्यस्मिन् शब्दे कः लकारः?

क) लट् लकारः ख) लृट् लकारः

ग) लोट् लकारः घ) लङ् लकारः

12) 'विद्वान्' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) अविरतम् ख) मूर्खः

ग) अज्ञानी घ) कोविदः

13) 'प्रारभ्य' इत्यस्य शब्दस्य विलोमपदं किम्?

क) समाप्य ख) आरभ्य

ग) आरम्भ घ) प्रारम्भ

14) 'मृत्युम्' इत्यस्य शब्दस्य विलोमपदं किम्?

क) मरणम् ख) जीवनम्

ग) स्वर्गम् घ) विस्मृतम्

15) 'निःशेषविश्राणित' इत्यस्य शब्दस्य विशेष्यपदं किम्?

क) गुरुदक्षिणार्थी ख) कौत्सः

ग) फलप्रसूतिः घ) कोषजातम्

16) 'वार्तालापः' इत्यस्य शब्दस्य विशेषणपदं किम्?

क) संतुलितः ख) वर्षत्रयस्य

ग) ईश्वरः घ) रूक्षः

17) 'तस्यैव' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) तस्या + एव

ख) तस्य + एव

ग) तस्य + इव

घ) तस्या + इव